श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ पन्निरुनामम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पन्निरुनामम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकेशवो दिशि हरेरलिके च पाति
दीप्तश्चतुर्भिररिभिस्त्वधिकोऽनवद्यम्।
वेदैस्सुवर्णनगवत् हरितारुणो मां
आशाधिकाजमखवेदिभवोऽद्भुतो हि॥ 1 ॥

मदावलधराधरस्थितवलाहको वार्षुकः
धृताग्र्यचतुरम्बुजोऽद्भुतकरो हि नारायणः।
स पाशिदिशि चोदरे रुचिरनीलपाथोदवत्
वितीर्य कृपया श्रुतीरवति मां स्वरक्ष्यं विभुः॥ 2 ॥

नाथो दूतोऽप्यनादिद्विरदगिरिमहो माधवश्चित्रचर्यः
प्रीत्योरस्यूर्ध्वभागे चतसृभिरसमाभिर्गदाभिस्समेतः।
देवाधीशानरत्नप्रभ इह विकसत्पुष्पयोषाविभूषः
बुद्धौ नस्सम्प्रविश्य स्वयमधिकदयो वत्सलो रक्षतीशः॥ 3 ॥

गोविन्दश्शिशिरेन्दुभा धृतचतुश्चापश्च पापापहा
पाथोजासनसेवितः करिमहाद्रीशः शुभप्रेरकः।
ग्रीवायाः पुरतश्च दक्षिणदिशि स्थित्वा दयालुः प्रभुः
कर्मोन्मूल्य नियोज्य नश्च परिपात्यात्मीयसेवाविधौ॥ 4 ॥

विष्णुर्दक्षिणकुक्षिभागमविहायैवोत्तराशां तथा
    निष्यन्दन्मधुफुल्लपद्मसुमनः किञ्जल्कवर्णाकृतिः।
हस्तालङ्कृतिभिर्भिनत्ति सकलं पापं चतुर्भिर्हलैः
    राजत्सान्द्रपलाशिषण्डकरिगिर्यूर्ध्वस्थकल्पद्रुमः॥ 5 ॥

माध्वीपूर्णसुवृक्षकोपवनके नागाद्रिशीर्षे स्थितः
    वर्षी सन् मधुसूदनो दिशि शुचेः बाहौ च मे दक्षिणे।
सर्वोद्गीतरमाधिवासिकमलश्रीः पूर्वकर्मानुगं
    पापौघं मुसलैश्चतुर्भिरिह नः सम्मर्द्य संरक्षति॥ 6 ॥

त्रिविक्रम इहेशिता करिगिरौ वसन्निष्टदः
    ज्वलज्ज्वलनभास्वरो वरदराज उत्कोशितान्।
विधृत्य विहरत्यसीन् निजकरैस्समुज्जृम्भितः
    विवृद्धबलरक्षसां दिशि च मे गले दक्षिणे॥ 7 ॥

वाग्देवीसमुपासितस्य चतुरास्यस्याध्वरे चोदितः
    स्वामी वामन आददान उदरं वामं च वायोर्दिशम्।
धामत्वेन युवार्कसन्निभतनुः क्षेमङ्करो नः प्लवः
    वज्रैस्तैश्च चतुर्भिरायुधवरैर्देवश्चकास्ते परः॥ 8 ॥

पूर्णो भव्यगुणैरिभाद्रिशिखरेऽपूर्णामृतः श्रीधरः
    स्वीकृत्योचितधाम वामभुजमप्यैशीं दिशं चाच्युतः।
सन्धार्येतरदुर्धरांश्च चतुरस्तान् पट्टसाख्यानसीन्
    राजत्पाण्डरपद्मसन्निभतनुर्भीतिं भिनत्तीह नः॥ 9 ॥

रोधस्यत्यन्तहृद्ये सुरभितमहितस्रोतसो वेगवत्याः
    नागाद्रीशो ह्यवाच्यां दिशि नृपतिवरैस्सेवितोऽत्यादरेण।
तेनङ्ग्रामस्थसाङ्गश्रुतिविदभिजनेशो हृषीकेश एषः
    विद्युद्भा वामकण्ठे मम च धृतचतुर्मुद्गरः पात्यधश्च॥ 10 ॥

संराजत्काञ्चनश्रीवरणपरिवृतानेकपाहार्ययोधः
स्वामी नः पद्मनाभो दृढमधिहृदयः पृष्ठदेशे स्थितश्च।
सत्याकारोऽभिकाङ्क्ष्यो रुचिररुचिसहस्रार्कवत् रम्यहस्तैः
धृत्वा पञ्चायुधानि स्वयमवति वदन् मा च भैषीरितीह॥ **11** ॥

महामोहापोहक्षमवरणकाञ्चीमरकतः
प्रभुश्चैको दामोदर इह भवेत् किन्विह गले।
प्रतीचीने मूर्तेर्बहिरपगतोऽन्तश्च वरदः
छिनत्ति व्यामोहं दिनमणिनिभश्च स्वयमहो॥ **12** ॥

नामानि द्वादशैतान्यविनिकटचराण्येव भक्तेरधीत्य
भ्राम्याद्वादार्थितन्त्रोद्भिदलनविजयिन्यात्मनि ध्यायतां च।
श्रीमन्नागाद्रिभूषाञ्चितपुरवरदं संश्रितानां प्रभुं नः
गाथाश्चैतास्सुभोग्याः परमपदनिदानं हि सिध्यन्ति चार्थाः॥ **13** ॥

श्रीमते निगमान्त महादेशिकाय नमः

वेदान्तार्यगुरूत्तमा अभिदधुर्लोकोपदेशेच्छया
गाथा द्वादशनामवैभवजुषः पुण्ड्राधिदेवाञ्चिताः।
अर्थं देशगिरा गिरा सुमनसां श्लोकांश्च तासां पुनः
श्रीमद्देशिकवर्य एव कृपया गोपालतोऽकारयत्॥

श्रीदेशिकप्रबन्धस्थः भागो द्वादशनामकः।
सार्थः संश्लोकितश्चापि पूर्णतां प्रीयतां गुरुः॥

॥ इति द्वादशनाम प्रबन्धः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥